**२०२१-२२**

**शास्त्री-परीक्षा**

**खण्डः–द्वितीयः, अधिसत्रं–द्वितीयम्**

**विषयः- अनिवार्यसंस्कृतम्, पत्रं- द्वितीयम्**

---

**समय - ३½ होराः** **सम्पूर्णाङ्काः – ७०**

**निर्देशः – एकस्यां पंक्तौ दश शब्दाः प्रतिपृष्ठं च अष्टौ पंक्तयो लेख्याः ।**

**१. अधोलिखिताः सर्वेप्रश्नाः समाधेयाः-** **१x१०=१०**

**क.** बुद्धचरितस्य रचयिता कः?

**ख.** राजकुमारः कीदृशं स्यन्दनमारुरोह?

**ग.** बुद्धचरिते कति सर्गाः?

**घ.** बुद्धस्य पितुः किं नाम आसीत्?

**ङ.** अश्वघोषस्य जन्मस्थानं किं?

**च.** बुद्धचरितस्य नायकः कः?

**छ.** अश्वघोषस्य मातुर्नाम किमासीत्?

**ज.** बुद्धचरिते तृतीयसर्गस्य नामास्ति?

**झ.** गौतमबुद्धस्य माता का?

**ञ.** चिकित्सितं कः चकार?

**२. अधोलिखितेषु द्वयोः पद्ययोः सप्रसङ्गं व्याख्या विधेया॥** **८**

**क.** अथो नरेन्द्रः सुतमागताश्रुः शिरस्युपाघ्राय चिरं निरीक्ष्य।
गच्छेति चाज्ञापयति स्म वाचा स्नेहान्न चैनं मनसा मुमोच॥

**ख.** परस्परोत्पीडनपिण्डितानां संमर्दसंक्षोभितकुण्डलानाम्।
तासां तदा सस्वनभूषणानां वातायनेष्वप्रशमो बभूव॥

**ग.** प्रत्यङ्गहीनान्विकलेन्द्रियांश्च जीर्णातुरादीन् कृपणांश्च दिक्षु।
ततः समुत्सार्य परेण साम्ना शोभां परां राजपथस्य चक्रुः॥

**घ.** प्रासादसोपानतलप्रणादैः काञ्चीरवैर्नूपुरनिस्वनैश्च।
वित्रासयन्त्यो गृहपक्षिसंघानन्योन्यवेगांश्च समाक्षिपन्त्यः॥

**३. अधोलिखितासु सूक्तिषु द्वयोः आशयं संक्षेपेण स्फुटीकुरुत-** **८**

**क.** "ज्ञात्वा ततः स्त्रीजनवल्लभानां ..................."?

**ख.** ततः प्रकीर्णोज्ज्वलपुष्पजालं

**ग.** निः सृत्य कुब्जाश्च महाकुलेभ्यो

**४. बुद्धचरिते तृतीय सर्गस्य सारांशो लेख्यः।** **८**

**अथवा**

अश्वघोषस्य रचनापरिचयं निरूपयत।

**५. अधोलिखितेषु कानिचित्** <u>**चत्वारि**</u> **सूत्राणि सोदाहरणानि व्याख्येयानि-**

**४x४=१६**

**क.** कर्मणि द्वितीया

**ख.** स्वतन्त्रः कर्ता

**ग.** प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा

**घ.** अकथितं च

**ङ.** नमस्स्वस्तिस्वाहास्वधालंवषड्योगाश्च

**च.** ध्रुवमपायेऽपादानम्

**छ.** सप्तम्यधिकरणे च

**६. अधोलिखितेषु केचित् चत्वारः प्रयोगाः सूत्रोल्लेखपूर्वकं साधनीयाः।**

**२x४=८**

**क.** हरिः सेव्यते

**ख.** वलिं याचते वसुधाम्

**ग.** प्रजाभ्यः स्वस्ति

**घ.** रामेण बाणेन हतो बाली

**ङ.** स्थाल्यां पचति

**च.** ग्रामाद् आयाति।

**७. अधोलिखितेषु किमपि त्रयमवलम्ब्य टिप्पणी विधेया। ३x४=१२**

कालिदासः, श्रीहर्षः, विश्वनाथः, माघः, शूद्रकः, दण्डी।

********************